# Shri Viththala Kavacham

# શ્રીવિઠ્ઠલકવચમ્

## Document Information

Text title : Viththala Kavacham

File name : viThThalakavacham.itx

Category : vishhnu, kavacha

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 11, 2023

*sanskritdocuments.org*

# શ્રીવિઠ્ઠલકવચમ્

સૂત ઉવાચ ।
શિરો મે વિઠ્ઠલઃ પાતુ કપોલં મુદ્ગરપ્રિયઃ ।
નેત્રયોર્વિષ્ણુરૂપી ચ વૈકુણ્ઠો ઘ્રાણમેવ ચ ॥ ૧॥

મુનિસેવ્યો મુખં પાતુ દન્તપઙ્ક્તિં સુરેશ્વરઃ ।
વિદ્યાધીશસ્તુ મે જિહ્વાં કણ્ઠં વિશ્વેશવન્દિતઃ ॥ ૨॥

વ્યાપકો હૃદયં પાતુ સ્કન્ધૌ પાતુ સુખપ્રદઃ ।
ભુજૌ મે નૃહરિઃ પાતુ કરૌ ચ સુરનાયકઃ ॥ ૩॥

મધ્યં પાતુ સુરાધીશો નાભિં પાતુ સુરાલયઃ ।
સુરવન્દ્યઃ કટી પાતુ જાનુની કમલાસનઃ ॥ ૪॥

જઙ્ઘે પાતુ હૃષીકેશઃ પાદૌ પાતુ ત્રિવિક્રમઃ ।
નિખિલં ચ શરીરં મે પાતાં ગોવિન્દમાધવૌ ॥ ૫॥

અકારો વ્યાપકો વિષ્ણુરક્ષરાત્મક એવ ચ ।
પાવકઃ સર્વપાપાનામકારાય નમો નમઃ ॥ ૬॥

તારકઃ સર્વભૂતાનાં ધર્મશાસ્ત્રેષુ ગીયતે ।
પુનાતુ વિશ્વભુવનં તોઙ્કારાય નમો નમઃ ॥ ૭॥

મૂલપ્રકૃતિરૂપા યા મહામાયા ચ વૈષ્ણવી ।
તસ્યા બીજેન સંયુક્તયકારાયનમો નમઃ ॥ ૮॥

વૈકુણ્ઠાધિપતિઃ સાક્ષાદ્વૈકુણ્ઠપદદાયકઃ ।
વૈજયન્તીસમાયુક્તો વિકારાય નમો નમઃ ॥ ૯॥

સ્નાતઃ સર્વેષુ તીર્થેષુ પૂતો યજ્ઞાદિકર્મસુ ।
પાવનો દ્વિજપઙ્ક્તીનાં ઠકારાય નમો નમઃ ॥ ૧૦॥

વાહનં ગરુડો યસ્ય ભુજઙ્ગઃ શયનં તથા ।

વામભાગે ચ લક્ષ્મીશ્ચ લકારાય નમો નમઃ ॥ ૧૧॥

નારદાદિસમાયુક્તં વૈષ્ણવં પરમં પદમ્ ।
લભતે માનવો નિત્યં વૈષ્ણવં ધર્મમાશ્રિતઃ ॥ ૧૨॥

વ્યાધયો વિલયં યાન્તિ પૂર્વકર્મસમુદ્ભવાઃ ।
ભૂતાનિ ચ પલાયન્તે મન્ત્રોપાસકદર્શનાત્ ॥ ૧૩॥

ઇદં ષડક્ષરસ્તોત્રં યો જપેચ્છ્રદ્ધયાન્વિતઃ ।
વિષ્ણોસ્સાયુજ્યમાપ્નોતિ સત્યં સત્યં ન સંશયઃ ॥ ૧૪॥

ઇતિ શ્રીપદ્મપુરાણે વિઠ્ઠલકવચં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Viththala Kavacham*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*